

# ॥ श्रीविशालाक्षी स्तुतिः – श्रीव्यास कृतं – सौर पुराणम् ॥

## Sri Vishalakshi Stuti – By Sage Vyasa – Saura Puranam

The following is a rare hymn on **Sri Vishalakshi** of **Varanasi** by **Sage Vyasa** taken from **Saura Puranam** and **Chapter 8** titled **Trilochana Mahatmyam.** The brief **Phalashruti** mentions that one who takes bath in river **Ganga** in **Varanasi**, has darshan of **Sri Vishalakshi** and recites this hymn begets the benefit of performing **1000 Ashwamedha Yagas** and one who reads or listens to **Trilocana Mahatmyam** reaches the abode of **Lord Shiva**.

श्रीव्यास उवाच –

विशालाक्षी नमस्तुभ्यं परब्रह्मात्मिके शिवे ।
त्वमेव माता सर्वेषां ब्रह्मादीनां दिवौकसाम् ॥ १ ॥

इच्छाशक्तिः क्रियाशक्तिर् ज्ञानशक्तिस् त्वमेव हि ।
ऋज्वी कुण्डलिनी सूक्ष्मा योग-सिद्धि-प्रदायिनी ॥ २ ॥

स्वाहा स्वधा महाविद्या मेधा लक्ष्मीः सरस्वती ।
सती दाक्षायणी विद्या सर्व-शक्ति-मयी शिवा ॥ ३ ॥

अपर्णा चैकपर्णा च तथा चैकैकपाटला ।
उमा हैमवती चापि कल्याणी चैव मातृका ॥ ४ ॥

ख्यातिः प्रज्ञा महाभागा लोके-गौरीति-विश्रुता ।
गणाम्बिका महादेवी नन्दिनी जातवेदसी ॥ ५ ॥

सावित्री वरदा पुण्या पावनी लोक-विश्रुता ।
आयती नियती रौद्री दुर्गा भद्रा प्रमाथिनी ॥ ६ ॥

कालरात्री महामाया रेवती भूत-नायिका ।
गौतमी कौशिकी चाऽऽर्या चण्डी कात्यायनी सती ॥ ७ ॥

वृष-ध्वजा शूलधरा परमा ब्रह्मचारिणी ।
महेन्द्रोपेन्द्र-माता च पार्वती सिंह-वाहना ॥ ८ ॥

## ॥ फलश्रुतिः ॥

एवं स्तुत्वा विशालाक्षीं दिव्यैर् एतैः सुनामभिः ।
कृतकृत्यो ऽभवद् व्यासो वाराणस्यां द्विजोत्तमाः ॥ ९ ॥

वाराणस्यां विशालाक्षी गङ्गा विश्वेश्वरः शिवः ।
भक्तिः पशुपतौ तत्र दुर्लभं हि चतुष्टयम् ॥ १० ॥

यः पश्यात विशालाक्षीं स्नात्वा गङ्गाम्भसि द्विजाः ।
अश्वमेध-सहस्रस्य फलं आप्नोत्यनुत्तमम् ॥ ११ ॥

वाराणस्यास्तु महात्म्यं इति किञ्चिन् मयोदितम् ।
यः पठेच् छृणुयाद् वाऽपि याति माहेश्वरं पदम् ॥ १२ ॥

---

**॥ इति श्रीसौरे उपपुराणे सूत-शौनक-संवादे त्रिलोचन-माहात्म्ये श्रीव्यास-कृत श्रीविशालाक्षी स्तुतिः सम्पूर्णम् ॥**